५८६

नं० ५३८६ - प

उभयतोमुखी (नर्मिकापडो)

गोदानविधिः

पत्राणि ३० (त्रिंशत्) सम्पूर्णम्

नं० ७३

संवत् १६५२

लेखकः पं० व्रजवासी

नं. ६८२
उभयतोमुखी गोदान-
विधिः
३० पत्र
सं. १९५२

नं० ५३७६-घ
उभयतोमुखीगोदानविधिः (कर्मकाण्ड)
पत्राणि ३० (त्रिंशत्) (सम्पूर्णम्)
संवत् १९५२ लेखकः पं० व्रजवासी

5376
Ff. = 30
Complete

उ. गो. १

ॐ श्रीगणेशाय नमः अथोभयतोमुखी
गोदानविधिः स्कंदपुराणे ब्रह्मयमानाथो
गां च दद्यादुभयतोमुखीं यथोक्तेन विधा
नेन स जातिस्मरतां लभेत् १ नंदिपुराणे
यस्त्वोभयमुखीं दद्याद्गां विप्रे वेदवादिनि
देवाय वाप्यभीष्टाय स कुलान्येकविंश
तिः २ समुद्धृत्य नरस्तिष्ठेन्नरकाद्धलणे
तिकं युगादि रोमतुल्यानि यदि श्रद्धापरो
नरः ३ याज्ञवल्क्यः सवत्सारोमतुल्यानि यु
गान्युभयतोमुखीं दत्वा स्वर्गमवाप्नोति पू
र्वेण विधिना दद्या ३ पूर्वेण विधिना हेम
रौप्यखुरेत्यादिना ब्रह्मपत्येत्तु दानोक्तैः वि
स्तुः अथ प्रसूयमाना गौः पृथिवी भवति
तामलंकृत्य सत्ववर्णां विप्राय दत्वा पृथिवी
दानफलमाप्नोति ४ अथ गाथा भवति स
वत्सा रोमतुल्यानि युगान्युभयतोमुखीं
दत्वा स्वर्गमवाप्नोति श्रद्दधानः समाहितः ५

महाभारते यावदर्धप्रसूता गौस्तावत्सा
पृथिवी स्मृता पृथिवी तेन दत्ता स्यात्ताद
शीं गां ददाति यः ६ देवलः यावद्वत्स
मुखो योनौ न यावद्गर्भं निष्कृतिः याव
न्नजायते पेतुस्तावद्भूः सचराचरा ७ स्व
लंकृत्वोक्तविधिना स्वर्णत्रिपलान्विता
दातव्या द्विपला मध्या पलाद्या कन्यकाम
ता ८ दत्वेमां पुरुषः स्वर्गे वसत्यमरपूजितः
गोवत्सतनुलोमानि युगानीप्सितभोग
वान् ९ मत्स्यपुराणे स्वर्णशृङ्गी रौप्यखु
रा मुक्तालांगूलभूषिता कांस्योपदोहना
राजन्सवत्सा द्विजपुंगवे १० प्रसूयमा
नां यो दद्याद्धेनुं द्रविणसंयुतां द्रविणमेव
दक्षिणारूपम् न च भूरिदक्षिणा इत्यग्रे विधा
नाद नल्पं देयं यावद्वत्सो योनिगतो यावद्ग
र्भं न मुंचति तावद्गौः पृथिवी ज्ञेया सशैलव
नकानना ११ प्रसूयमानां यो दद्याद्धेनुं द्रविण
संयुतां ससमुद्रगुहा भूमिः सशैलवनका
नना १२ चतुरन्ता भवेद्दत्ता पृथिवी नात्र

उ. गो. २

संशयः यावंति धेनु रोमाणि वत्सस्य च न
राधिप १३ तावत्संख्या युगगणान्देवलोके
महीयते पितृन्पितामहांश्चैव तथैव प्रपि
तामहान् १४ उद्धरिष्यत्यसंदेहो नरकाद्भू
रिदक्षिणः घृतक्षीरवहाः कुल्या दधिपा
यसकर्दमाः १५ यत्र तत्र गतिस्तस्य भवे
च्चेप्सितकामदाः गोलोकः सुलभस्तस्य ब्रह्म
लोकस्य पार्थिव १६ स्त्रियश्चतं चंद्रसमान
वक्त्राः प्रतप्तजाम्बूनदतुल्यवर्णाः महा
नितंबस्तनमध्यहीना भजन्त्यजस्रं नलि
नाभनेत्राः १७ वाराहपुराणे सुवर्णशृं
गीयः कृत्वा रौप्यखुरांकां खुरेपृष्ठ ब्राह्मणस्य
करे दत्वा सुवर्णं रौप्यमेव च १८ कपिलायास्तु
दापुच्छे ब्राह्मणस्य करं न्यसेत् उदकं च करे
दत्वा वाचयेच्छ्रद्धयान्वितः १९ ससमु
द्रवना तेन सशैलवनकानना रत्न
पूर्णा भवेद्दत्ता पृथिवी नात्र संशयः
२० पृथिवीदानतुल्येन दानेनैते

2

नमानवः नारीनैर्यातिपितृभिर्विस्मार्यं त्वंपद
मव्ययं २१ ब्रह्मस्वहारकोगोघ्नोभ्रूणहापाक
भेदकः महापातकयुक्तोपिवंचकोब्रह्मह
घकः २२ निन्दकोब्राह्मणानांचनेषांकर्मवि
घातिनः एवंपातकयुक्तोपिगवांदानेनशु
ध्यति २३ यस्त्वोमयस्तुवींदद्यात्तस्मैनकांन
कांचनं तद्दिनेपायसाहारःपयसावापिवा
श्नीयात् २४ स्वर्णस्यसहस्रेणनदत्वैनापिता
मिति तस्याप्यर्हशतंचाथपंचाशच्चततोर्ह
कं २५ यथाशक्त्याप्रदातव्यंवित्तशाठ्यविव
र्जितम् इमांगृहाणोभयमुखींसर्वाख्याता
ममास्तुवै २६ ममवंशाविशुद्धेश्चसदास्व
स्तिकरोभव इत्यावतीयेतुमन्त्रीचेशमिः प्र
तिगृह्णामितांयेतुऊर्द्वबाह्येविशोध
नः स्वस्तिभवतुतेनित्यंरुद्रमातर्नमोस्तु
ते २७ ॐद्यौस्त्वाददातुपृथिवीत्वाप्रतिगृ
ह्णातु ॐकइदंकस्माअदादितिजपेन्मंत्रंव
स्त्वपरे विसृजेद्ब्राह्मणंदेविगांचतस्यगृ

उ· गो· ३

हं नयेत् २८ उभयशिरसं दद्यादित्यनुवृत्तौ
ध्रुवनः तस्याः प्रदानकालाः प्रसवकालो
नान्यप्रतीते कालेष्वतीपातविषुवायनष
डशीतिमुखविष्णुपदाद्याग्रहणान्ताः २९
सर्वपर्वपुण्यकालास्तद्दैवसार्थप्रस्तुताय
वेतनवस्त्रान्तो ब्राह्मणं ब्रूयात् व्रतशीलसम्प
शौचवृत्तजातिक्रियाद्यैः उ· गुणैरुपेतं च
तथा प्राणिपत्य ब्रूयाद् हमतीवार्तः सवा
त्सरग्रहणुद्धानार्थं लिप्सयागत्वा इति दाता या
वत्सामनुमंत्रयेत् त्वां महीमवनिं विश्वधा
त्रीमिति प्रार्थना कउदं कस्मा अदादिति
गृहीत्वायां दक्षिणेन पाणिना वत्समाक
र्षयेत् गर्भसंस्रवेत्तु सामवेदमिति जप
न् निष्क्रान्ते ग्निस्तुपसमाधाय देवानृ
त्नदीपर्वतान्वनस्पतीन्नुदधीन्नागा
नोषधीस्तर्पयेत्तैस्तैर्मंत्रैस्तेषां मंत्रप
दानि भवन्ति ॐ ये देवासो दिव्येकाद
शास्थ १ ॐ उपास्तव्यातिथी ॥

मसि २ ॐ इमं मे गङ्गे यमुने सरस्वति ३
ॐ अद्भिः स्नातो मती निश्चिनो हि ४ ॐ व
नस्पते शतवल्शो वि रोह ५ ॐ समुद्रज्ये
ष्ठाः सलिलस्य मध्यात् ६ ॐ अहिरिव भो
गैः ७ ॐ मधुवाता ऋतायते मधुक्षरंति ८
इति मंत्राः तदनु पार्थिवीभिः पृथिवी न प
येन् द्यावापृथिवी पूर्वहूतये मही द्यौः पृ
थिवी बह्वलह्वरे श्रुते गौरीर्मिमाय सलिला
नि सन्न तेत्यादिभिश्च ततः सगोत्राज्याहुतीर्जु
होति ब्राह्मणान्भोजयेत्स्वस्त्ययनं वाचयति
अथास्य कर्मणो बुद्धिमुदाहरंति अभक्ष्यभ
क्षणमपेयपानं ब्रह्मघ्नपितृसयपवधुना
या ति उपाध्यानी स्वासु तानां स्वामी भार्या मातरं
मातृस्वसारं मातुलानीं भगिनीं भागिनेयीं
शिष्यभार्यां धात्रीमन्यागम्यागम्यां गत्वा स
परिकरां ब्राह्मणाय दद्यात् परिकरोऽस्याः
सुवर्णं द्रव्यं रत्नानि क्षेत्राणि ग्रामा वथा
नानि वस्त्राणि रसा लवणाद्याश्चंदना

उ. गो. ४

नागोधाःशतंगवांनदर्यमर्घंवामहर्घंवस्त्र
वासहस्रंतथाब्राह्मणायदद्यात् महापात
काद्विमुक्तोभवति इत्युभयतोमुखीगोदा
नविधिः अथपद्धतिर्लिख्यते ततोयज
मानःप्रह्वयमानोसुरभिंदक्षाम्बनशी
लसत्यशौचव्रतजातिक्रियाद्यैर्गुणैरु
पेतंब्राह्मणमाहूयस्वागतमित्युक्त्वाप्र
णम्य गणेशंसंपूज्य इष्टदेवतानत्वा
वरणंसामग्रींसमाप्य पंचमंत्राञ्जपेत्
तद्यथा ओंइदंविष्णुर्विचक्रमेत्रेधानिद
धेपदं समूढमस्यपांशुरे १ ओंत्रीणि
पदाविचक्रमेविष्णुर्गोपाअदाभ्यः अ
तोधर्माणिधारयन् २ ओंविष्णोःकर्माणि
पश्यतयतोव्रतानिपस्पशे इंद्रस्ययुज्यः
सखा ३ ओंतद्विष्णोःपरमंपदंसदापश्यं
तिसूरयःदिवीवचक्षुराततं ४ तद्विप्रासो
विपन्यवोजागृवांसःसमिंधतेविष्णो
र्यत्परमंपदम् ५ इतिपठित्वा अर्चयेत्सं
स्थाप्य प्राणानायम्य कुशतिलयव

जलान्यादाय देशकालौ संकीर्त्य अमुक
शर्माहं कायिकवाचिकमानसिकपात
कोपपातकमहापातकत्रयपूर्वकं उ
भयतोमुखीरोमसंख्यायुगसंख्यावच्छि
न्नब्रह्मलोकोपभोगावाप्तिकामः श्रीना
रायणप्रीतिकामो वा उभयतोमुखीगोदा
नं करिष्ये तदङ्गत्वेन यानस्वस्तिग्रहार्थं प्रति
गृहीतविप्रस्य पूजनपूर्वकं वरणं च क
रिष्ये तथा उभयतोमुख्यास्य पूजनं करि
ष्ये इति संकल्प्य प्रतिगृहीतारं ब्राह्मण
मुदङ्मुखमासनोपर्युपवेश्य पादप्र
क्षालनं कुर्यात् मंत्रः आपद्घनध्वान्तस
हस्रभानवः समीहितार्थार्पणकाम
धेनवः अपारसंसारसमुद्रसेतवः पुन
न्तु मां ब्राह्मणपादपांसवः १ अनेन मंत्रे
ण ब्राह्मणस्य पादप्रक्षालनं विधाय वि
प्रो वदेत् दर्शनान्नृत्विप्रहीयन्ते पापराशयः
स्पर्शनात्संगलावाभिर्वन्दनाद्बुतंपद
म् इति प्रपांसाच अघार्हं भूमिदेवाग्र

उ. गो ५

जन्मासितं विप्र पुरुषोत्तम प्रत्यक्षो यज्ञ
पुरुष ब्रह्मचर्यं प्रतिगृह्यतां ३ अथ आचम
नीयं ॐ आगागात्यशसा संसृज वर्चसा त
माकुरु प्रियं प्रजानामधिपतिं पशूनामरि
ष्टं तनूनाम् ४ अथ स्नानीयार्थं कमंडलुं
निवेद्य अथ वस्त्रम् ॐ युवा सुवासाः परि
वीत आगात् स उ श्रेयान् भवति जायमानः ते
धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देव
यन्तः ५ अथ यज्ञोपवीतं ॐ यज्ञोपवीतं प
रमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आ
युष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बल
मस्तु तेजः ६ अथ गंधम् ॐ गन्धद्वारां दुरा
धर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभू
तानां तामिहोपह्वये श्रियम् ७ अथ पुष्पा
णि सुगंधीनि सुपुष्पाणि मालत्यादी
नि वै प्रभो मयानीतानि पूजार्थं पु
ष्पाणि प्रतिगृह्यताम् ८ अथाक्षताः
ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधू
षत अस्तोषत स्वभान ॥

वोविश्राम्यपिहृद्यामतीयोजात्विंदन्तेहरी ९
अथमाल्य यद्यशोप्सरसामिंद्रश्चकारवि
पुलंपृथुः तेनसंग्रथिताःसुमनसआबध्ना
मियशोमयि ९ अथालंकरणम् ॐअलं
करणमसिभूयोलंकरणंभूयः ११ अथाद
र्शम् ॐरोचिस्णुरसि १२ अथछत्रम् ॐबृ
हस्पतेछदिरसिपाप्मनोमामन्तर्द्धेहिते
जोयशसोमामन्तर्धेहि १३ अथपादुको
पानहौ ॐप्रतिष्ठेस्थोविश्वतोमापातं १४
अथधूपम् ॐधूरसिधूर्वधूर्वंतंधूर्वतंयो
स्मान्धूर्वतितंधूर्वयंवयंधूर्वामः देवा
नामसिवह्नितमम् सस्नितमंपप्रितमं य
जुष्टतमंदेवहूतमम् १५ अथदीपम् आज्यं
सहर्तिसंयुक्तंवह्निनायोजितंमया दीपं
ज्ञानप्रदंदेवविप्रवर्यनमोस्तुते १६ अ
थनैवेद्यम् अन्नंचतुर्विधंस्वादुरसैःष
ड्भिःसमन्वितम् भक्ष्यभोज्यसमायुक्तंनैवे
द्यंप्रतिगृह्यताम् १७ ततोवरणसामग्रीकरेग

उ॰ हीत्वाह्वणयात् ॐमद्येत्यादिमासपक्षाद्यु
गो॰ ल्लिख्य अमुकोहंकर्त्तव्यउभयतोमुखीगोदा
९ नकर्मणिप्रभिर्गंधाक्षतपुष्पमालापूगीफ
लतांबूलकमंडलुपादुकोपानहासनछ
त्रचामरवासोलंकारैरमुकगोत्रममुकप्र
वरममुकवेदाध्यायिनममुकशर्माणमुभ
यतोमुखीगोदानप्रतिग्रहार्थंत्वामहंवृणे
ब्राह्मणश्चवृतोस्मीतिप्रतिब्रूयात् ततोय
जमानोब्राह्मणंप्रार्थयेत् यद्यत्कृतंवि
प्रत्वब्रह्मस्वरूपिणः तत्सर्वंममदीनस्य
विश्वेशस्समर्पणम् ततःपाद्यार्घ्यादिगं
धाक्षतपुष्पैः उभयतोमुखींपूजयेत् उभ
यतोमुख्यैनमः इत्यक्षतैःप्रतिष्ठाप्य अथा
वाहनं गंधाक्षतपुष्पाणिगृहीत्वा ॐआ
वाहयाम्यहंदेवीगांत्वांत्रैलोक्यमातरम्
यस्याःस्मरणमात्रेणसर्वपापैःप्रमुच्य
ते १ त्वंदेवीत्वंजगन्मातात्वमेवासिव
सुंधरा सावित्रीत्वंचगायत्रीगंगात्वं

8

वेसरस्वती २ त्वणानि मह्यं से नित्यमस्तु ते
स्त्वसिद्धमो भूतप्रेतपिशाचाश्च पितृदैव
तमानुषान् ३ सर्वांस्तारयसे देविनरकात्पा
पसंकटात् इत्यावाहः ॐ उभयतोमुख्यै न
मः पाद्यम् अथार्घ्यम् सर्वांस्तारयसे देवि स
र्वदेवस्वरूपिणि गृहाणार्घं मयादत्तं सौरभे
यि नमोस्तु ते ४ ॐ गो अग्रपादाभ्यां नमः गो
रस्यायनमः गोःशृंगाभ्यां नमः गोःस्कंधाय
नमः गोपृष्ठायनमः गोपुच्छायनमः ॐ
पश्चात्पादाभ्यां नमः इति सर्वांगेषु र्वं दद्या
त् ॐ उभयतोमुख्यै नमः आचमनीयं ॐ उ
भयतोमुख्यै नमः स्नानीयम् ॐ अम्बे अम्
बिके अम्बालिके न मानयति कश्चन स
सत्यश्वकः सुभद्रिकां कांपीलवासिनी ५
अथ वस्त्रं आच्छादनं तथादपात्सम्पक
शुद्धं स्नातिर्मलं स्वाभिर्वस्त्रदानेन प्रीय
तां परमेश्वरी ६ अथ गंधं ॐ गंधद्वारां दु
राधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं स

उ॰ गौ ७

सर्वभूतानांतामिसिद्धोपकयेश्रियं ७ सर्व
देवप्रियं देवि चंदनं चंदनसंयुतम् कस्तूरीकुं २०
ऊमाढ्यं च गोगंधः प्रतिगृह्यताम् ८ पु
ष्पाक्षताः ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽ
अधूषत अस्तोषत स्वभानवो विप्रामभि
ष्ठयामती योजान्विंद्र ते हरी ९ अथ पुष्पा
णि सुगंधीनि सुपुष्पाणि मालत्यादीनि वै
प्रभो मयानीतानि पूज्यार्थं पुष्पाणि प्रतिगृ
ह्यताम् १० अथ धूपं वनस्पतिरसोद्भूतो
गन्धाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां
धूपोयं प्रतिगृह्यतां ११ अथ दीपम् आनं
दकृत्सर्वलोके देवानां सुसदाप्रिये गोत्वं
पाहि जगन्नाथे दीपोयं प्रतिगृह्यतां १२ अ
थ नैवेद्यं सुरभिस्त्वंजगन्मातानानित्यंविष्णु
पदेस्थिता सर्वदेवमयं ग्रासं मयादत्तमि
मं ग्रस १३ नैवेद्यं हि मयादत्तं सुरभिः प्रीय
तामिति सौरभेय्यः सर्वहिताः पवित्राः पाप
नाशनाः प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमा

नमः १४ इति यासं दत्वा अथ नैवेद्यं यन्मयार्पि
तं देवि घंटाचामरभूषितं नैवेद्यं तद्गृहाण त्वं दे
वि त्रिदशवंदिते १५ एवं प्रयोगेण स्नानगंधा
क्षतपुष्पधूपदीपनैवेद्यफलवस्त्रादिभिः सम
यतोमुद्रांपूजयित्वा यथोक्तालंकारादिभि
रलंकृत्यांगदेवताः पूजयेत् तद्यथा गंधाक्ष
तपुष्पं गृहीत्वा शिरसि ब्रह्मणे नमः १ अन
यैव रीत्या सर्वाङ्गदेवताः पूजयेत् लला
टे ओं वृषभध्वजाय नमः २ भ्रुवोर्मूले इ
ष्टापूर्तीभ्यां नमः ३ भ्रुवोरग्रयोः इंद्राग्नीभ्यां न
मः ४ भ्रूमध्यान्तरे ओं विश्ववे नमः ५ कर्णयोः
ओं अश्विनीकुमाराभ्यां नमः ६ चक्षुषोः शशि
सूर्याभ्यां नमः ७ घ्राणे ओं सर्वगन्धेभ्यो नमः
मुखे सामवेदाय नमः ९ जिह्वायां ओं सरस्वत्यै ८
नमः १० दन्तेषु ओं मरुद्भ्यो नमः ११ ओष्ठे ओं वैव
स्वताय नमः १२ ककुदि ओं शिवाय नमः १३ ग
ले ओं सप्तस्वरेभ्यो नमः १४ चतुष्पादेषु ओं चतु
र्वर्णेभ्यो नमः १५ खुरमूले ओं गंधय ॥

उ· गो· ८

वेभ्योनमः १६ खुरमध्ये ॐअप्सरोगणेभ्यो
नमः १७ खुराग्रेषु ॐपर्वतेभ्योनमः १८ जं
घासु ॐवायुभ्योनमः १९ दक्षऊरौ ॐकु
वेरायनमः २० वामऊरौ ॐवरुणायन
मः २१ पुच्छे ॐयमायनमः २२ ऊधसि ॐ
समुद्रेभ्योनमः २३ स्तनेषु ॐस्वाहाका
रस्वधाकारवषट्कारहंतकारेभ्योनमः २४
रोमकूपेषु ॐऋषिभ्योनमः २५ उदरे ॐ
स्कंदायनमः २६ दक्षपार्श्वे ॐमारुतायन
मः २७ वामपार्श्वे ॐयक्षेभ्योनमः २८ आ
पादतलमस्तकेषु ॐचतुर्दशभुवनेभ्यो
नमः २९ अपाने सर्वतीर्थेभ्योनमः ३० प्र
स्रवे गंगाजलायनमः ३१ गोमये ॐशांति
सहितमहालक्ष्म्यैनमः ३२ गोमूत्रे पुष्टिसहि
तसर्वमंगलेभ्योनमः ३३ घृते ॐसर्वयज्ञे
भ्योनमः ३४ हुंकारे चतुर्वेदेभ्योनमः ३५ हे
भाशब्दे ॐप्रजापतयेनमः ३६ उपरि ॐविश्वे
भ्योदेवेभ्योरुद्रेभ्यआदित्येभ्योवसुभ्योनमः ३७

8

एवमंगदेवतास्समभ्यर्च्य गंधाक्षतपुष्पाणि
दाय कृतांजलिर्दीना धेनुमुपतिष्ठेत् ॐ या
लक्ष्मीः सर्वदेवानां या च देवेष्ववस्थिता धेनु
रूपेण सा देवी मम शान्तिं प्रयच्छतु १ देहस्था
या च रुद्राणी शंकरस्य सदा प्रिया धेनुरूपेण
सा देवी मम पापं व्यपोहतु २ विष्णोर्वक्षसि
या लक्ष्मीः स्वाहा या च विभावसोः चंद्रार्कश
क्रशक्तिर्या धेनुरूपास्तु सा श्रिये ३ चतुर्मुख
स्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च लक्ष्मीर्या लोक
पालानां सा धेनुर्वरदास्तु मे ४ स्वधा त्वं
पितृमुख्यानां स्वाहा यज्ञभुजां यतः स
र्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे
५ पंच गावः समुत्पन्ना मथ्यमाने म
होदधौ तासां मध्ये तु या नन्दा तस्यै दे
व्यै नमो नमः ६ नागाः पुच्छे खुराग्रेषु
ते चाष्टकुलपर्वताः मूत्रे गंगादयो
नद्यो नेत्रयोः शशिभास्करौ ७ एते य
स्यां स्थिता देवा सा धेनुर्वरदास्तु मे ८

उ॰ गो॰ ५

9

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ४
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहं गा
वो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः ५
सौरभ्यः सौरभेयी च सरितः सागरं यथा
गाश्च पपाप्रणाम्यहं नित्यं गावः प्रपुण्यन्तु मां स
दा ६ गावो स्माकं वयं तासां यतो गावस्त
तो वयं सर्वदेव इति संप्रार्थ्य ब्राह्मणम
पि पुष्पमालादिभिः संपूज्य ततो वादित्रा
दिमंगलाचरणं कृत्वा ये तु दद्यात् तथा
गन्धाक्षत पुष्पं गृहीत्वा ओं सोपकरणोभय
तोमुखीं ददाति इति द्विजे दक्षिणे जलं दद्या
त् ददस्वेति ब्राह्मणो वदेत् ततः कनक
समन्विताज्यपात्रं करे कृत्वा तत्र गोपुच्छं
निपाय कुशतिलयवजलान्यादाय यदा
न संकल्पं कुर्यात् ओं तत्सदद्येत्यादि मास
पक्षाद्युल्लिख्य अतीतानागतविविजन्मो
पार्जितवाङ्मनःकायोपार्जितो ज्ञातावस्ता
नाज्ञानकामकृताकामकृतसकृदसकृ

नानां कायिकवाचिकमानसिकसांसर्गिका
तिपातकलघुपातकोपपातकानां संकरी
करणमलिनीकरणपात्रीकरणजातिभ्रं
शकरणप्रकीर्णकपापानां सम्भावितानां
मयाकृतानांऽभक्ष्यभक्षणापेयपानास्पृ
श्यस्पर्शनाऽहिंस्यहिंसनाऽवेद्यवेदनापू
जनमातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेद
नस्वामिवञ्चनब्रह्मघ्नपितृहनननिषिद्धका
लमैथुनोपाध्यायीगमनस्वसुताभिगमन
स्वामिभार्याभिगमनमातृगमनमातृस्वसृ
गमनमातुलानीगमनभगिनीगमनभा
गिनेयीगमनशिष्यभार्यागमनधात्रीगम
नकूटसाक्षिसमस्तमहापातकोपपात
कत्रयसांसारिकपंचमहाक्लेशाभावोत्तर
तापत्रयत्रिविधोत्पातदोषत्रयविनाशान
दुःस्थानस्थितसूर्यादिग्रहजन्यजनितज
निष्यमाणसर्वारिष्टप्रतिपत्तिपितृपिताम
हप्रपितामहनरकस्थानविमुक्तिसर्वका

उ.
गो.
१९

लिकदधिक्षीरबहुनचफलभोगबहुहतधौ
लबहुनवनीतपर्वतप्राप्तिसगुडसमप्रोल
वनकाननचत्वरन्तपृथ्वीदानजन्यफल
प्राप्तिदशपूर्वदशपरात्मीयैककुलोद्धरण
हंसयुक्तसितचामरध्वजछत्रोपशोभितार्क
वर्णस्वर्णविमानारोहणेनस्वर्लोकयथे
ष्टाविहरणसुराङ्गनागणगीयमानदिव्य
10 भोगभोगित्वमाचिरमत्वंतरकालावच्छिन्नगो
लोकावस्थानानंतरैहिकविशालभूपालकुल
जन्मदीर्घायुरारोग्यधनधान्यबहुपुत्रपौत्रा
द्यभ्युदयैश्वर्यसौख्ययशस्कीर्तिप्रबलप्रता
पोन्नतप्रशालीनसर्वजनाश्रयत्वस्थरत्व
सर्वसपत्नजनजयसर्वान्तरससर्वस
मृद्धिबहुदानत्वबहुयज्ञयाजित्वांत
ह. कालिकरिस्मरणादशार्बुदशानसह
स्राष्टादशसहस्रसंख्याकाब्दावच्छिन्न
धर्मवदात्मीयशोकदुःखदौर्गत्यानवा
प्तितेनउभयतोस्तु ॥ ॥

त्वींगोरोमरूपसमसंख्यककोटियुगावच्छि
न्नश्रीवैकुंठगमनश्रीविष्णुसायुज्यप्राप्तिका
मनयाइमांसुवर्णशृंगींरौप्यखुरांताम्रपृ
ष्ठांकांस्योपदोहनांमुक्तालांगूलभूषितांसु
वर्णतिलकालंकृतभालांदिव्यरत्नालंकृ
तांघंटायैवचभूषितांनानारत्नसंयुतांसि
तवस्त्रयुगाच्छन्नांकांस्यपात्रसंयुतांगन्धमा
ल्यालंकृतांसुपूजितांगंदेवताधिष्ठितशरी
रांसर्वपीलामभयतोमुखींगांरुद्रदेवताम
मुकगोत्रायामुकप्रवरायामुकशाखाध्यायि
नेऽमुकदेवशर्मणेब्राह्मणायतुभ्यमहंसं
प्रददे ॐददस्वेतिब्राह्मणोवदेत् ततोयज
मानोदानवाक्यंपठेत् इमांगृहाणोभयमुखीं
भवाब्धितारिणीममात्त्वंवै ममवंशविवृद्धयेस
दास्वस्तिकरीभव १ इतिदानवाक्यंपठित्वा
दानप्रतिष्ठांकुर्यात् ॐमयाकृतेतत्सोपक
रणोभयतोमुखीगोदानप्रतिष्ठार्थं इदंसु
वर्णंवह्निदैवतंयथानामगोत्रायब्राह्म

णा यत्तुभ्यं मह्यं समप्रददे इति दानप्रतिष्ठां द
त्वा ततो धेनुं प्रदक्षिणीकुर्यात् मंत्रो यथा
इडावती धेनुमती हि भूयाथं सूयवसिनी म
नवे दशस्याः अस्कभ्ना रोदसी भानुना भा
स्वतः १ ॐ त्वं महीमवनिं विश्वधात्रीं धेनुं
श्रीतपसा वाहयन्ती श्रमयोमसैजदर्णी
स्तुतरणामक्षुणोरिन्द्रः सिंधुरिति २ इति मं
त्रेणैतां प्रदक्षिणीकृत्य ततो गन्धाक्षतपु
ष्पं गृहीत्वा कृतांजलिर्दाता मंत्रं पठेत् मंत्र
स्य ॐ यज्ञसाधनभूता या विश्वस्याघप्र
णाशिनी विश्वरूपधरो देवः प्रीयतामन
या गवा इति मंत्रं पठित्वा ततः कुशातिल
यवजलाक्षतकनकघृतं पुच्छसहितं सा
ज्यपात्रं विप्रहस्ते दद्यात् ततो ब्राह्मणः स्व
स्तीत्युक्त्वा मंत्रं पठेत् मंत्रस्य प्रतिगृह्णा
उं मि त्वां धेनुं कुटुम्बार्थे विशेषतः स्वस्ति भ
वतु ते नित्यं रुद्रमातर्नमोस्तु ते १ ॐ द्यौ
स्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ततः को
दादि

निस्वगाद्वीयांकामस्तुतिंपठेत् ॐको
दात्कस्माऽदात्कामोदात्कामायादात् कामो
दाताकामःप्रतिगृहीताकामैतत्ते १ ॐसो
मोधेनुꣳसोमोऽर्वन्तमाशुꣳसोमोवीरं
कर्मण्यंददातिसादन्यंविदथ्यꣳसभेयं
पितृश्रवणंयोददाशदस्मै २ इतिपठित्वा
यजमानायाशिषंदत्वासर्वंसंभारमात्म
सात्कृत्वास्वगृहंप्रतिव्रजेत् ततोयजमानो
ब्राह्मणेनसमन्वितोगामनुव्रज्यगोमंत्री
जपेत् गावःसुरभयोनित्यंगावोगुग्गुल
गन्धिकाः गावःप्रतिष्ठाभूतानांगावःस्वस्त्य
यनंमहत् १ अन्नमेवपरंगावोदेवानांहवि
रुत्तमम् पावनंसर्वभूतानांरक्षन्तिचव
हन्तिच २ हविषामंत्रपूतेनतर्पयन्त्यम
रान्दिवि ऋषीणामपिहोतृणांगावोहोम
प्रतिष्ठिकाः ३ सर्वेषामपिभूतानांगावः
शरणमुत्तमं गावःपवित्रंपरमंगावोम
गोवसाम्यहं ४ गावःस्वर्गस्यसोपानंगा

उ॰गो॰
१२

12

वोधन्याः सर्वा हन्ताः ॐ नमो गोभ्यः श्रीम
तीभ्यः सौरभेयीभ्य एव च नमो ब्रह्मसुता
भ्यश्च पवित्राभ्यो नमो नमः ५ ब्राह्मणा
श्चैव गावश्च कुलमेकं द्विधा कृतं एकत्र
मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति ६ घृ
तक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः
घृतनद्यो घृतावर्त्तास्ता मे संतु सदा गृहे ७
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं
घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितं ८
गावो ममाग्रतो नित्यं गावः पृष्ठत एव च
गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहं ९
इति पठित्वा विसर्जयेत् निष्क्रांते श्रग्निमु
पसमाधाय देवान्पितॄन्नदीः पर्वतान्वन
स्पतीन्नदधीनागानोषधीस्तर्पयेत्ते
मंत्रैस्तेषां मंत्रपदानि भवंति ॐ ये देवासा
उपांतस्त्वा इमे मे गंगे श्रद्धिभिः स्तुतोम वन
स्पते सत्व ब्रह्मण्या श्राह्रि हि विभोगैः मधुवाता
इति मंत्रः नदनपार्थिवीभिः पृथिवीं तर्पयेत्

द्यावापृथिवीमहीद्यौः वज्रुलहूरेइत्याद
यः श्रंतेगौरीर्मिमायतन्वैतेत्यादिभिश्च
न्तरप्शीत्याज्याहुतीर्जुहोति तद्यथा तत्रस
मचतुरस्रंस्थंडिलंनिर्माय अथातोगृह्य
स्थालीपाकानांकर्मसंकल्पः ॐमद्येत्या
दिमासपक्षाद्युल्लिख्यअमुकोहंकृतस्यो
भयतोमुखीगोदानस्यांगत्वेनाग्निस्थापनं
करिष्ये ततःशुद्धायांभूमौस्थंडिलेकुंडेवात्रि
भिर्दर्भैःपरिसमूहनंगोमयोदकेनानुलेप
नंखादिरेणस्रुक्स्फ्यानिनास्फेनोल्लेखनंत
दभावेस्रुवेणप्रागग्रास्तिस्रोरेखाःकृत्वास्रु
वाभावेकुशैरेवाःकुर्यात् उद्धृत्यानामिकांगु
ष्ठाभ्यांयथोपलिखिताभ्योरेखाभ्यःपांसू
नुद्धृत्यईशानकोणेनिःक्षिपेत् अभ्युक्ष्य
मणिकोदकेन अग्निमुपसमाधाय ताम्र
पात्रस्थितंवैयांस्ताभिमुखंस्थापयेत् एते
चपंचभूसंस्काराः ततस्तत्कर्मोक्तंवह्नि
मावाहयेत् ततअग्नेरीशानेकलशंसंस्था

प्यतयथा अग्नेरीशानभागेअव्रणंधान्न
मयंमृण्मयंकलशंदध्यक्षतचंदनमाला
चर्चितंविधायचूताश्वत्थवटोदुम्बरपल्ल
शपंचपल्लवसहितंवस्त्राच्छन्नंकलशंस्था
पयेत् तत्रमंत्राः ॐमहीद्यौःपृथिवीच
नइमंयज्ञंमिमिक्षतां पिपृतांनोभरीमभि
१ इतिभूमिस्पर्शने ॐओषधयःसंवदन्ते
सोमेनसहराज्ञायस्मैकृणोतिब्राह्मण
स्तंराजन्पारयामसि २ इतियवास्त
इतिक्षिपे ॐआजिघ्रकलशंमह्यात्वा
विशंत्विंदवःपुनरूर्जानिवर्तस्वसानःस
हस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविश
ताद्रयिः ३ इतिवहिर्दध्यक्षतविभूषितं
चंदनमालाचर्चितंकलशंस्थापयेत् ॐ
वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भस
र्जनीस्थोवरुणस्यऋतसदन्यसिवरुण
स्यऋतसदनमसिवरुणस्यऋतसदनमा
सीद ४ इतिमंत्रेणजलेनपूरणम् ॐ
पंचनद्यःसरस्वतीमपियन्तिसस्रोतसः

सरस्वतीतुपंचधासोदेशेभवत्सरित् ५
इतिगंगादितीर्थजलेनापूर्य ॐगंधद्वारां
दुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींस
र्वभूतानांतामिहोपह्वयेश्रियं ६ इतिगंध
ॐओषधयःसंवदंतसोमेनसहराज्ञा यस्मै
कृणोतिब्राह्मणस्तंराजन्पारयामसि ७
इत्यवनात् ॐकांडात्कांडात्प्ररोहंतीपरुषः
परुषस्परि एवानोदूर्वेप्रतनुसहस्रेणशतेनच
८ इतिदूर्वांनिक्षिप्य ॐयाःफलिनीयाअफ
लाअपुष्पायाश्चपुष्पिणी बृहस्पतिप्रसूता
स्तानोमुंचंत्वंहसः ९ इतिपूगीफलं ॐया
ओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरामनैनु
बभ्रूणामहंशतंधामानिसप्तच १० इति
सर्वौषधीहरिद्रावा ॐअश्वत्थेवोनिषदनं
पर्णेवोवसतिष्कृताःगोभाजइत्किलास
थयत्सनवथपूरुषं ११ इतिपंचपल्लव
न्पणं ॐस्योनापृथिवीभवानृक्षरानिवे
शनी यच्छानःशर्मसप्रथाः इमपोमद्वः

उ.गो.
१४

ॐपरिवाजिपतिःकविरग्निर्हव्यान्यक्र
मीत् दधद्रत्नानिदाशुषे १३ इतिपंचरत्ना
ति ॐपयःपृथिव्यांपयओषधीषुपयोदि
व्यंतरिक्षेपयोधाःपयस्वतीःप्रदिशःस
तुमह्यं १४ इतिपयः ॐदधिक्राव्णोअ
कारिषंजिष्णोरश्वस्यवाजिनःसुरभिनो
मुखाकरत्प्राणआयूंषितारिषत् १५
इतिदधि ॐघृतवतीभुवनानामभिश्रि
योर्वीपृथ्वीमधुदुघेसुपेशसा द्यावापृ
थिवीवरुणस्यधर्मणाविष्कंभितेअ
जरेभूरिरेतसा १६ इतिघृतं ॐहिरण्यग
र्भःसमवर्त्तताग्रेभूतस्यजातःपतिरे
कआसीत् सदाधारपृथिवींद्यामुतेमांक
स्मैदेवायहविषाविधेम १७ इतिहिरण्यं
ॐयदश्वापवासउपस्तृणंत्यधिवासंयाहिर
ण्यान्यस्मैसंदानमर्वन्तंपड्वीशंप्रियादेवेष्वा
यामयंति १८ इतिवस्त्रं ॐयुवासुवासाः
परिवीतआगात्सउश्रेयान्भवतिजायमा
नःतंधीरासःकवयउन्नयंतिस्वाध्योम

14

नस्मादेवयत्न: १९ इति रक्तवस्त्रेण वे
ष्टनं ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जा
यतामाराष्ट्रे राजन्य: शूर इषव्योऽतिव्याधी
महारथो जायतां दोग्ध्री धेनुर्वोढानड्वाना
शु: सप्ति: पुरंधीर्योषा जिष्णूरथेष्ठा: सभे
योयुवास्य यजमानस्य वीरो जायतां निका
मे निकामे न: पर्जन्यो वर्षतु फलवत्यो न
ओषधय: पच्यन्तां योगक्षेमो न: कल्पतां २०
इति ब्रह्माण्डं कलशे निधाय ॐ पूर्णा दर्वि
परापत सुपूर्णा पुनरापत वस्नेव विक्री
णावहा इषमूर्जं शतक्रतो: २१ इति क
लशोपरि पात्रं पूर्णपात्रं न्यस्य ॐ तत्त्वा
यामि ब्रह्मणा वन्दमानस्तदाशास्ते यज
मानो हविर्भि: अहेडमानो वरुणेह बोध्यु
रुशंस मा न आयु: प्रमोषी: २२ इत्यने
नैव वरुणमावाह्य तत: कलशाभिमन्त्रणं
कलशस्य मुखे विष्णु: कण्ठे रुद्र: समाश्रित:
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणा: स्मृता: २३

उ.गो.
१५

ऊर्द्धोत्तसागराः सप्तसप्तद्वीपावसुंध
राऋग्वेदोथयजुर्वेदःसामवेदोप्यथर्वणः
षडंगैश्चसहिताःसर्वेकलशेत्वसमाश्रि
ताःसर्वेसमुद्राःसरितस्तीर्थानिजलदा
नदाःआयान्तुयजमानस्यदुरितक्षय
कारकाः २५ अप्यकलशप्रार्थना उत
रेहिमवत्पार्श्वेक्षीरोदोनामसागरः प्रा
दुर्भूतोमंथनात्तत्रदेवैर्दानवसंघनैः २६
मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिं
मूलेकूर्मंतुसंस्थाप्यविष्णुप्रभृतिदेवताः २७
देवदानवसंवादेमथ्यमानेमहोदधौ उत्प
न्नोसितदाकुंभविधृतोविष्णुनास्वयं २८
अर्जुनीगोमतीचैवचंद्रभागासरस्वती
कावेरीवेत्रवतीरोहिणीगंगाचैवमहानदी २९
त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थि
ताः त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्र
तिष्ठिताः ३० शिवःस्वयंत्वमेवासिविष्णु
स्त्वंचप्रजापतिः आदित्यावसवोरुद्रावि
श्वेदेवाःसपैतृकाः ३१ त्वयितिष्ठंतिसर्वेपि
यतःकामफलप्रदाः

15

त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥२१
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ स्थि
रो भव वीड्वङ्ग — आशुर्भव वाज्यर्वन् पृथु
र्भव सुषदस्त्वमग्नेः पुरीषवाहनः ॥२२ ततः
प्रतिष्ठा ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृ
हस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञप
तिं तेन मामव ॥ मनो जूतिर्जुषतामाज्य
स्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ
ं समिमं दधातु विश्वेदेवास इह माद
यन्तामोम्प्रतिष्ठ ॐ भूर्भुवः स्वः कलश
मध्ये ब्रह्मवरुणौ सुप्रतिष्ठितौ भवतां
तथा कलशमध्ये आदित्यादिनवग्रहाः
अधिदेवताप्रत्यधिदेवता विनायकादि
पंचलोकपालेन्द्रादिदशदिक्पालसहि
ताः इहागच्छन्तु इह तिष्ठन्तु सुप्रतिष्ठिता
वरदा भवन्तु ॥ इत्यनेन प्रतिष्ठाप्य ततो र
क्षाविधानं यवान् कुशांस्तथा दूर्वां सर्ष
पान्तां यमन्तान् गोमयं दधि संडकं कार

उ.गो. येनात्र भाजने १ एवंविधां पोटलिकां कृत्वा
१९ तदभावे त्रिगुणीकृतं रक्तसूत्रं संस्कार्य पोट
लिकामंत्रानुक्रमंत्रांश्च पठेत् मंत्रा यथा
गं गणाधिपं नमस्कृत्य नमस्कृत्य पिताम
हं विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीं
16 क्षेत्रपालं नमस्कृत्य गणनाथं निशाकरं
धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं २
दैत्याचार्यं नमस्कृत्य नमस्कृत्य शनैश्चरं
राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः ३
शक्राद्या देवताः सर्वा नमस्कृत्य मुनीन्स्त
था गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमं ४
वसिष्ठं मुनिशार्दूलं विश्वामित्रं महामु
निं व्यासं कविं नमस्कृत्य सर्वशास्त्रविशा
रदम् ५ विद्यातास्तु नयो ये च आचार्याश्च
तपोधनाः सर्वे ते मम यज्ञस्य रक्षां कुर्वन्तु
विघ्नतः ६ प्राचीं रक्षतु गोविंद आग्नेयीं ग
रुडध्वजः याम्यां रक्षतु वाराहो नारसिंहस्तु
नैरृतीं ७ केशवो वारुणीं रक्षेद्वायवीं मधु

सुदर्शनः ७ दीर्घी श्री धरो रक्षेद्देशान्नीचगदा
धरः ८ ऊर्ध्वं गोवर्धनधरो ह्यवाचीं धरणीधर
एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ९ य
ज्ञाग्रे रक्षतात्शंखः पृष्ठे पद्मं तथोत्तमं वाम
पार्श्वे गदा रक्षेद्दक्षिणे च सुदर्शनं १० उपे
न्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः अ
च्युतः पातु ऋग्वेदं यजुर्वेदं मधोक्षजः ११
कृष्णो रक्षतु सामानि अथर्वं माधवस्त
था उपविष्टास्तु ये विप्रास्ते ते रक्षेन्नरक्षि
तः १२ यजमानं सपत्नीकं पुंडरीकविलो
चनः रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्ष
तां हरिः १३ वेदमंत्रैस्तु कर्तव्यं रक्षाश्च
सर्षपैः कृत्वा पोटलिकां पूर्ववद्धी
या दक्षिणे करे १४ आदौ गायत्रीपाठः ओं
गणानां त्वा गणपतिं हवामहे प्रिया
णां त्वा प्रियपतिं हवामहे निधीनां त्वा
निधिपतिं हवामहे वसो मम आहमजा
नि गर्भधमा त्वमजासि गर्भधं १ जातवेदसे
सुनवाम सोममरातीयतो निदहाति वेदः

उ.गो.
१७

17

स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दु
रितात्यग्निः २ ओं विहृदसि विहृते त्वा प्रहृद
सि प्रहृते त्वा विहृदसि विहृते त्वा संहृदसि
संहृते त्वाक्रमोस्याक्रमाय त्वा संक्रमोसि सं
क्रमाय त्वोत्क्रमोस्युत्क्रमाय त्वोत्क्रान्तिर
स्युत्क्रान्त्यै त्वाधिपतिनोर्जोर्जं जिन्व ३ ओं
न तद्रक्षांसि न पिशाचास्तरन्ति देवा
नामोजः प्रथमजं ह्येतत् यो बिभर्ति
दाक्षायणा हिरण्यं शतानीकाय सु
मनस्यमानाः तन्म आबध्नामि शतशार
दायायुष्माञ्जरदष्टिर्यथासत् ४ ओं रक्षो
हणं वलगहनं वैष्णवीमिदमहं तं वलग
मुत्किरामि यं मे निष्ट्यो यममात्यो निच
खानेदमहं तं वलगमुत्किरामि यं मे समानो
यमसमानो निचखानेदमहं तं वलगमु
त्किरामि यं मे सबंधुर्यमसबंधुर्निचखाने
दमहं तं वलगमुत्किरामि यं मे सजातो
यमसजातो निचखानोत्कृत्यां किरामि ५ ओं स्वराडसि
सपत्नहा सम्राडस्यभिमातिहा जनरा
डसि रक्षोहा सर्वराडस्य

मित्रहा ६ ॐ रक्षोहणो वो वलगहनः प्रो
क्षामि वैष्णवान्रक्षोहणो वो वलगहनो ऽव
नयामि वैष्णवान् रक्षोहणो वो वलगहनो
ऽवस्तृणामि वैष्णवान् रक्षोहणौ वां वलग
हना उपदधामि वैष्णवी रक्षोहणौ वां वल
गहनौ पर्यूहामि वैष्णवी वैष्णवास्य ७ ॐ
मा नः श५ंसो ऽअररुषो धूर्तिः प्रणङ्म
र्त्यस्य रक्षा णो ब्रह्मणस्पते ८ ॐ ग्रस्तमह५ं
रक्षः प्रस्तुष्ट्राग्रा नयो निष्पमं५ं रक्षोति
न्पमा ग्रानयः उष्ठ्लतिरिलमन्वेति ९
रक्षोहा विश्वचर्षणिरभियोनिमयोहते
द्रोणे सधस्थमासदत् १० पंचैतैर्मंत्रैः पोट्टलि
कां रक्षा सूत्राणि वाभिमंत्र्य पतन्त इति
पठित्वा रक्षे सु प्रतिष्ठिता वरदा भव इति प्र
तिष्ठाप्य कलशे स्थापयेत् ततः कर्मान्ते
दक्षिणहस्ते बध्नीयात् इति रक्षाविधानं त
तो ग्रहयजन संकल्पः विधिनाग्रेऽर्घ्ये संस्था
प्य प्राणानायम्य कुश तिल यव जल पा

ऊ. गो
१८

18

णिः ॥ अद्येहेत्यादिमासपक्षाद्युल्लिख्य
अमुकोऽहममुककामः कलशोपर्यावा
हितानामादित्यादिनवग्रहाणामधिदेव
ताप्रत्यधिदेवताविनायकादिपंचलोक
पालानां इन्द्रादिदशदिक्पालानां वास्तो
ष्पतेः क्षेत्रपालस्य च यथामिलितोपचा
रैः पूजनं करिष्ये ॥ आवाहनादिमंत्रास्त्वग्रेप्र
दर्श्यन्ते पद्मासनं इत्याद्याध्यानमंत्राः ॥ आ
ह्लेनेमादयः पूजनमंत्राः ॥ १ ततोग्रेहव
रतः प्राङ्मुखमासीनं स्वयमनुरामिमत्वो
भूत्वा कर्मतत्वत्समनलसं ब्राह्मणं हृण
यात् तद्यथा ॐ अद्येत्यादिमासपक्षाद्यु
ल्लिख्यामुकोऽहममयतेमुखीगोदानेन
संगत्वेन त्वत्स्वल्पकर्मकर्तृब्राह्मणस्य पूज
नपूर्वकं वरणं च करिष्ये ॥ इति संकल्प भू
मिदेवायेत्यर्घं दत्त्वा ॐ भूमिदेवाग्रजन्मासि
त्वं विप्रकृषीजन्म प्रत्यक्षयज्ञपुरुष अद्ये
यं प्रतिगृह्यतां ॥ १ इत्यर्घं दत्त्वा ॐ ब्रह्मयज्ञा
नं प्रथमं पु

स्ताद्वि सीमतः सुरुचो वेनऽआवः स बु
ध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमस
तश्च विवः इति मंत्रेण गंधाक्षतपुष्पादिभिः
संपूज्य वरणसामग्रीको गृहीत्वा ओंणाभि
गंध्याक्षतपुष्पपूगीफलयज्ञोपवीतदक्षि
णावासोभिः कृतस्योभयतोमुखीगोदान
स्यानुग्रहं कृत्वैतद्धोमकर्मणि ब्रह्मत्वेन त्वाम
हं वृणे वृतोऽस्मीति ब्रह्मा प्रतिब्रूयात् ततो य
जमानस्याग्नेर्दक्षिणतो ब्रह्मासनं त्रिभिः
कुशैरास्तीर्य अग्नेः पूर्वमार्गेणासनेवो
पवेश्य ब्रह्मन्नमास्मिन्कर्मणि कृताकृ
तावेक्षणाय ब्रह्मा भव भवानीति प्रत्युक्तिः
यथा चतुर्मुखो ब्रह्मा सर्ववेदधरो विभुः त
था त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।
इति प्रार्थयेत् ततश्चात्मासनं यजमानास
ने कृत्वा प्रणीयत्रप इति शेषः ततोऽग्ने
रुत्तरतः प्रागग्रकुशैरासनद्वयं कल्प
यित्वा प्रणीतापात्रं चतुर्थस्थानेष्टगंधया

उ· गो· २९ दत्तैः संपूज्य सव्ये हस्ते कृत्वा जलेन पूरयि
त्वा दर्भैराछाद्य पश्चिमासने निधाय प्रणा
मिकांगुष्ठाभ्यामालभ्य पूर्व्वासने स्थापयेत्
परिस्तीर्य ईशानादुत्तरपर्यंतं प्रागग्रैः कु
शैर्वेद्याः समंतात्परिस्तरणं कुर्यात् अर्थव
दासाद्यमर्थवंति प्रयोजनवंति उत्तरेहस्ता
स्थापयेत् यथा पवित्रछेदनानि त्रीणि कुश
तरुणानि द्वे पवित्रे साग्रे अनंतर्गर्भे द्वे कुश
तरुणे पवित्रार्थे प्रोक्षणीपात्रं वारणं तैज
सं वा आज्यस्थाली चरुश्च चरुस्थाली ताम्रम
यी सम्मार्जनकुशाः पंच उपयमनकुशास्त्रिः
प्रभृतः समिधस्तिस्रः प्रादेशमात्रः स्रुवः
खादिरः गव्यमाज्यं व्रीहितंडुलाः पूर्णपात्रं
कर्मोपयोगिनी दक्षिणा वरो वेति ततः
पवित्रे कुर्यात् त्रिभिः कुशतरुणैरग्रतः
प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रच्छि
द्य प्रोक्षणीपात्रे वामहस्ते कृत्वा तः
॥ ॥

19

स्मिन्याग्रांतरेण हस्तेन वा प्रणीतोदकमा
सिंच्य तेन जलेन पूर्वपवित्राभ्यां अर्थवत्सो
त्प अर्थवंतिस्त्राज्यस्थाल्यादीति पूर्णपात्र
पर्यंतानि प्रोक्ष्य चरुपदे स्वयं तंडुलान्क्षा
ल्य चरुस्थाल्यां निधाय चरुमग्नौ वाधिश्रि
त्य वक्ष्मानि पृण्याज्यं अधिश्रित्य पर्यग्निकुर्या
त् अर्थश्रितचरोराज्यस्य च ज्वलडलकं
प्रदक्षिणस्य मन्त्रा ह्वामयेत् अथ स्रुवं प्रतप्य स्क
वंधाव मयो मूलं वितापयित्वा संमार्जनकु
शाग्रैर्मूलतोग्रपर्यंतं अग्रतो मूलपर्यंतं
कुशमूलैः संमृज्य प्रणीतोदकेनाभ्युक्ष्य
पुनः प्रतप्य दक्षिणतो निदध्यात् आज्यग्र
हस्य तत्र आज्यं चरोः पूर्वेणोद्वास्य अग्रेण त
रतः स्थापयेत् तत आज्यमग्रेः पश्चिमेन आ
नीय रुचव्वानीय आज्यस्योत्तरतः स्थापये
त् तत आज्ये पूर्वपवित्राभ्यां उत्पूयैव ऊर्ध्वं
निक्षिप्य अवेक्ष्यापद्रव्यनिरसनं कृत्वा उ
पयमन कुशानादाय वामहस्ते कृत्वा

उ॰
गो॰
२॰

20

तिष्ठन्नसि पोष्याद्राय स्वाज्येनाक्तः कृत्वा उ
स्थाय स्वाहेत्युत्तरतन्त्रग्रीवं प्रक्षिपेत् ततः प्रो
क्षणपुटकेन सपवित्रे चुलकगृहीतेन हो
मीयद्रव्यं संततधारेणाईप्रणीताद्युत्तरपर्यन्तं
निषिच्य पवित्रे प्रणीतायां निधाय संस्रव
धारणार्थं पात्रान्तरमुत्तरतः प्रणीताग्नेर्मध्ये
निधाय अग्निमावाहनं पात्रान्तपुष्पैः पूजये
त् ॐ पतन्ते देव सवितरिति पठित्वा भूर्भुवः
स्वः बलदनामाग्ने इहागच्छेह तिष्ठ सुप्रति
ष्ठितो भव इति प्रतिष्ठाप्य ॐ चत्वारि शृंगा त्र
यो॰ अस्य पादा द्वे शीर्षे सप्त हस्तासो॰ अस्य त्रि
धा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ
विवेश । अग्निं प्रज्वलितं वन्दे जातवेदं हु
ताशनम् सुवर्णवर्णममलं समिद्धं स
र्वतोमुखम् २ ॐ अग्नये नमः इति नाममं
त्रेण संपूज्य अत्र द्रव्यत्यागः द्रव्यत्यागं
यजमान एव कुर्यात् अद्येहेत्यादि दे
शकालौ संकीर्त्य ॥ अमुको ।

दस्तुभयतोमुखींगोदानोत्तराङ्गत्वेनहोम
कर्मणोहं यक्ष्ये नवग्रहाराज्यभागदेवताभ्यो
महाव्याहृतिदेवताभ्यःसर्वप्रायश्चित्तदेवता
भ्यःप्रजापतीन्द्राग्निसोमेभ्यःआज्येनसवितृ
सोमभौमबुध गुरुशुक्रशनिराहुकेतुभ्यः
समिद्भिर्व्रीहितिलादिभिर्देवपितृनदीपर्वतव
नस्पत्तुदधिनागेभ्यःधीपृथिवीगौरीभ्यःआ
ज्येनप्रत्येकमष्टोत्तरशतमष्टसंख्यानसंख्य
यायक्ष्ये तद्यागेन पतावत्संख्याकंसंपा
दितमिदंसमिद्व्रीह्यादिद्रव्यंपूर्वोक्तदेवता
प्रीतयेपत्नीभ्योदेवेभ्यःइदं माउपमयापरित्य
क्तंयथादैवतमस्तु तत्सर्वंममतनःस्तु वे
णांयंमरडीनादक्षिणंज्वालाचक्रलक्षणान्वा
दीमीनमस्कामप्रजापतिंध्यात्वाजुहुयादाघारा
दीन् ॐप्रजापतयेस्वाहा इदंप्रजापतये इ
तिप्राचमूर्ध्वमस्तु मन्त्रमाप्य नाग्नेरुत्तरप्रदे
शेजुहुयात् इतिस्पागंविधाय उत्तरशेषपा
ग्रोवेमिलिपेत् ॐमिन्द्रायस्वाहा इदमिन्द्रायउ
र्ध्वलिपेत् अग्नेर्दक्षिणप्रदेशे ॐअग्नयेस्वा
हा इदमग्नये उत्तरपूर्वार्धेजुहुयात् सोमा

उ॰गो॰ स्वाहा इदं सोमाय दक्षिणपूर्वार्धे वह्नेर्लेलि
२८ पेत् इत्याघारावाज्यभागौ कृत्वा यथाक्रमस
मिद्धोमं कुर्यात् यथाक्रमसमिदभावे हुता
कैस्तिलैर्होमं कुर्यात् तत्र होममंत्राः ॐ आ
21 कृष्णेनेति हिरण्यस्तूप ऋषिस्त्रिष्टुप् छंदः स
विता देवता कपिलाग्नौ अर्कसमिद्धोमे वि
नियोगः ॐ आकृष्णेन रजसा वर्तमानो निवे
शयन्नमृतं मर्त्यं च हिरण्ययेन सविता र
थेना देवो याति भुवनानि पश्यन् स्वाहा इदं
सवित्रे इति नियोगः १ ॐ इमं देवा इति गौतम ऋ
षिस्त्रिष्टुप् छंदः सोमो देवता सोमप्रीतये पिंग
लाग्नौ पलाशसमिद्धोमे विनियोगः ॐ इमं दे
वा असपत्नं सुवध्वं महते क्षत्राय महते ज्ये
ष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमम
मुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी रा
जा सोमोस्माकं ब्राह्मणानां राजा स्वाहा इदं
सोमाय २ अग्निर्मूर्धेति विरूपाक्ष ऋषिर्गायत्री छं
दः भौमो देवता भौमप्रीतये धूम्रकेत्वग्नौ खदि
रसमिद्धोमे विनियोगः ॐ अग्निर्मूर्धा दिवः
ककुत्पतिः पृथिव्या अयं अपां रेता ०ः

ग्ँ सिसिञ्चति स्वाहा इदं सोमाय ४ ॐ उद्बु
ध्यस्वेति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दः बुधो देव
ता बुधप्रीतये जाठ गङ्गा वपामार्गसमिद्धोमे
विनियोगः ॐ उद्बुध्यस्वाग्ने प्रतिजागृहीत्व
मिष्टापूर्ते सꣳसृजेथामयं च अस्मिन्सधस्थे
अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत स्वा
हा इदं बुधाय ५ बृहस्पते इति गृत्समद ऋ
षिस्त्रिष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पति
प्रीतये शिख्यग्रोऽश्वत्थसमिद्धोमे विनियोगः
ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति
क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात
तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा इदं
बृहस्पतये ६ ॐ अन्नात्परिस्रुत इति प्रजाप
तिऋषिः सरस्वतीन्द्रा ऋषयः अतिजगतीछन्दः
शुक्रो देवता शुक्रप्रीतये हाटकाख्योदुम्बर
समिद्धोमे विनियोगः ॐ अन्नात्परिस्रुतो रसं
ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इ
न्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा इदं शुक्राय ७
ॐ शन्नो देवीति दध्यङ्ङाथर्वण ऋषिर्गायत्री

उ· गो· २२

22

छंदः शनिप्रीतये महातेजाश्रो[illegible]मासमिद्हो
मे विनियोगः ॐ शन्नो देवीरभिष्टय आपो
भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा ७ इ
दं शनये कयानश्चित्र इति वामदेव ऋषिर्गा
यत्रीछंदः राहुर्देवता राहुप्रीतये ऊनाशावे
ताशमीसमिद्होमे विनियोगः ॐ कयानश्चि
त्र आभुवदूती सदावृधः सखा कया शचिष्ठया
वृता स्वाहा इदं राहवे ८ ॐ केतुं कृण्वन्निति
मधुछंद ऋषिः गायत्रीछंदः केतुर्देवता के
तुप्रीतये धेनुहिताश्रोकुशासमिद्होमे विनियोगः
ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समु
षद्भिरजायथाः स्वाहा इदं केतुभ्यः न मध्येऽ
नाप्रधानेतिनिवनान् ग्रहेभ्यो नमः ॐ ये
देवासो दिव्येकादशस्थ पृथिव्यामध्येकादश
स्थ अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञ
मिमं जुषध्वं स्वाहा इदं देवेभ्यः १ ॐ उशन्तस्त्वा
निधीमह्युशन्तः समिधीमहि उशन्नुशत आ
वह पितॄन् हविषे अत्तवे इदं पितृभ्यः २
ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं
सचता परुष्ण्या असिक्न्या मरुद्वृधे वितस्त

॰ तिभ्यः ५ ॐसमुद्रज्येष्ठाः सलिलस्य ॰

[illegible] पुत्रहाम्रखोमयास्वाहा इदंन
दीभ्यः ६ ॐअश्वभिरत्नेडवोगिरिशोविश्वेभिःसो
मपीतनयेदेवेभिर्याह्यविजाः स्वाहाः इदम
द्रिभ्यः ७ ॐवनस्पतेस्पनवनुनोविरोह
सहस्रवल्शाविवयंरुहेम यंत्वामयंस्व
धितिस्तेजमानः प्रणिनायमहतेसोभगा
यस्वाहा इदंवनस्पतये मध्यात्पुनानायंत्यनिवि
शमानाः इन्द्रोयावज्रीवृषभोरराद ताआपो
देवीरिहमामवन्तुस्वाहा इदंसमुद्रेभ्यः ९
ॐअग्निरिवमोतेः पर्यग्निर्वाङ्ग्रपायादेति
परितापयमानः स्वज्ञुविश्वाभुवनानितिष्ठामे
धुमांसपरितापत्निविश्वतः स्वाहा इदंसर्पेभ्यः
७ ॐमधुवाताऋतायतेमधुक्षरंतिसिंधवःमा
ध्वीर्नःसन्त्वोषधीः स्वाहा इदमोषधीभ्यः ८
ॐस्योनापृथिविभवानृक्षरानिवेशनी यच्छा
नःशर्मसप्रथाः स्वाहा इदंपृथिव्यै ९ ॐमही
द्यौःपृथिवीचनइमंयज्ञंमिमिक्षतांपिपृतां
नोभरीमभिः स्वाहा इदंपृथिव्यै १० ॐवज्रत
हरैः व्रजकृभिः प्रायच्छोरोदसीमहित्वा इन्द्र
स्तोहवृत्रहापुरस्सेनसंसुभ्योध्याभराभूरिप

उ० गो० २३

स्वः स्वाहा इदं पृथिव्यै ११ ओं गौरीर्मिमाय स
लिलानि तक्षत्येकपदी द्विपदी सा चतु अष्टा
पदी नवपदी वभूवुषी सहस्राक्षरा परमेव्यो
मन्स्वाहा इदं गौर्यै १२ अनेन मंत्रेण चतुरशी
त्याज्याहुतीर्जुहुयात् एवं प्रकृतहोमं विधा
य आज्येन भूराद्यानवाहुतीर्जुहुयात् एवं
प्रकृतहोमं विधाय आज्येन भूराद्यानवाहु
तीर्जुहुयात् ब्राह्मणान्वारब्धः व्याहृतीनां
प्रजापतिरृषिः गायत्र्युष्णिगनुष्टुप्छंदांसि
अग्निवायुसूर्या देवता व्याहृतिहोमे वि
नियोगः ओं भूः स्वाहा इदमग्नये ओं भुवः
स्वाहा इदं वायवे २ ओं स्वः स्वाहा इद सू
दसूर्याय ३ ओं त्वन्नो अग्न इति वामदेव ऋषि
स्त्रिष्टुप्छंदः अग्नीवरुणौ देवते प्रायश्चित्तहो
मे विनियोगः ओं त्वन्नो अग्ने वरुणस्य विद्वान्दे
वस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशु
चानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदम
ग्नीवरुणाभ्यां ४ ओं स त्वन्नो अग्न इति वामदेव ऋषि
स्त्रिष्टुप्छंदः अग्नीवरुणौ देवते प्रायश्चित्तहोमे वि
नियोगः ओं स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठोऽ

॰अस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणंर
राणोवीहिमृडीकंसुहवोनएधिस्वाहा
इदमग्नीवरुणाभ्यां ५ अयाश्चाग्नेइतिप्र
जापतिऋषिर्विराट्छंदः अग्निर्देवताप्राय
श्चित्तहोमेविनियोगः ॐअयाश्चाग्नेस्यनभि
शस्तिपाश्च सत्यमित्वमयाअसि अयानोय
ज्ञंवहास्ययानोधेहिभेषजंस्वाहा इदम
ग्नये ६ येतेशतमितिशुनःशेपऋषिर्जगती
छंदः वरुणसवितृविष्णुविश्वेदेवामरुतः
स्वर्कादेवताःप्रायश्चित्तहोमेविनियोगः ॐ
येतेशतंवरुणयेसहस्रंयज्ञियाःपाशावित
तामहान्तःतेभिर्नोअद्यसवितोतविष्णुर्विश्वे
मुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायस
वित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः
७ उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुप्छंदःव
रुणोदेवता विश्वकर्मसुपाशोन्मोचनेविनि
योगः ॐउदुत्तमंवरुणपाशमस्मदवाधमंवि
मध्यमंश्रथाय अथावयमादित्यव्रतेतवा
नागसोःअदितयेस्यामस्वाहा इदंवरुणाया
दितये ८ ॐअग्नयेप्रजापतयेस्वाहा इदमग्न

उ॰ गो॰ २४

24

ग्नये प्रजापतये ॐ अग्नये स्विष्टकृते स्वाहा
इदमग्नये स्विष्टकृते ४ ततः संस्रवप्राश
ने पवित्राभ्यां मुखमार्जनं पवित्रयोरग्नौ प्र
तिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्र
दाने ॐ अद्येत्या [illegible] ममको
ष्टे कृतस्योभयस्य मुण्डी गोदानस्योपनयनहोम
कर्मणः सांगुण्यार्थं अपूर्णपरिपूर्णतार्थं इदं पू
र्णपात्रं सदक्षिणं ब्राह्मणाय तुभ्यमहं संप्रददे इ
ति संकल्प्य ब्रह्मणे दद्यात् ब्रह्मणो मंत्रपा
ठः ॐ अकर्म कर्मकृतः सह वाचा मयो
भुवा देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुव इ
ति पठित्वा यजमानस्य शिरसि दद्यात् ततः
पूर्णाहोमः ॐ अद्येत्यादि मम कोष्टे कृत
स्योभयस्य मुण्डी गोदानस्योपनयनहोम
कर्मणः सांगतासिद्ध्यर्थं साभ्युदयार्थं सक
लमंगलाभिवृद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये
इति संकल्पः मूर्धानमित्यस्य भरद्वाज ऋषि
स्त्रिष्टुप् छंदः महादेवो अग्निर्देवता पूर्णाहुति
होमे विनियोगः यजमानोन्वारब्धो जुहुया
त् ब्रह्मणा स्रुचोर्हृतं देयम् ॐ स्रुक्च स्रुवश्चमे

च मे श्राद्धश्च मे ऽयक्ष्माणि च मे ऽश्रेणाकलश
श्च मे ऽश्वाधानाश्च मे पृथिवी च मे ऽदितिश्च
मे ऽआहवनीयश्च मे वर्हिश्च मे वस्थश्च मे
स्वर्गाकाराश्च मे यज्ञेन कल्पन्तां इति मन्त्रेण
स्विष्टकृतं हुत्वा उत्थाय ओं मूर्धानं दिवो ऽअ
रतिं पृथिव्या वैश्वानरमृत ऽआजातमग्निं कवि
ꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त
देवाः स्वाहा ओं पूर्णादर्वि परापत सुपू
र्णा पुनरापत वस्नेव विक्रीणावहा इषमू
र्जꣳ शतक्रतो स्वाहा इत्यवाच्छिन्नधारया
जुहुयात् ततः पाणी प्रतप्य गात्रमालभे
त् ओं तनूपा ऽअग्ने ऽसि तन्वं मे पाहि आयु
र्दा ऽअग्ने ऽस्यायुर्मे देहि वर्चोदा ऽअग्ने ऽसि वर्चो मे दे
हि अग्ने यन्मे तन्वा ऊनं तन्म ऽआपृण ओं मे
धां मे देवः सविता आदधातु मेधां देवी सरस्व
ती आदधातु मेधामश्विनौ देवावाधत्तां पुष्क
रस्रजौ २ ओं अङ्गानि च म आप्यायन्तां वाक्
च म आप्यायन्तां प्राणश्च म ऽआप्यायन्तां चक्षुश्च
म ऽआप्यायन्तां श्रोत्रं च म आप्यायन्तां यशो
बलं च म आप्यायन्तां २ ततस्मादुघाणिक्रु

रुते भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि
त्र्यायुषं जमदग्नेरिति ललाटे कश्यपस्य त्र्यायु
षमिति ग्रीवायां यद्देवेषु त्र्यायुषमिति दक्षि
णांसे तन्नो ऽस्तु त्र्यायुषमिति हृदि ततो द
क्षिणा ॐ मद्येत्यादि अमुकोऽहं कृतस्योभ
यतोमुखीगोदानस्योत्तराङ्गत्वेनैतद्धोमक
र्मणः सांगतार्थं इदं सुवर्णमग्निदैवत
माचार्याय ब्राह्मणाय यथांशं विभज्य दातुमह
मुत्सृजे तत्सन्नमेति संकल्पः इति दक्षिणां द
त्वा ब्राह्मणभोजनसंकल्पः ॐ मद्येत्याद्यमु
कोऽहं कृतस्योभयतोमुखीगोदानस्योत्तराङ्ग
त्वेनैतद्धोमकर्मणः सांगफलप्राप्त्यर्थं नाना
नामगोत्रान्ब्राह्मणान्मिष्टान्नेन यथोपपन्ने
न वा भोजयिष्ये इति तथैतद्धोमकर्मणः सा
द्गुण्यतासिद्ध्यर्थं इमां भूयसीं दक्षिणां नानागो
त्रेभ्यो ब्राह्मणेभ्यो नटनर्तकगायकदीनाना
थेभ्यश्च यथांशं विभज्य दातुमहमुत्सृजेत्
त्सन्नमम इति भूयसीं दत्वा विसर्जयेत् या
न्तु देवगणाः सर्वे पूजामादाय मामकीं इ
ष्टकामसमृद्ध्यर्थं पुनरागमनाय च । गच्छ

गच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मा
दयोदेवास्तत्रगच्छजनार्दन २ इतिविस
र्जयेत् ततःसाचार्याःसर्वेऋत्विजःसकुटुंबं
भद्रासनोपविष्टंयजमानं शांतिकर्मतोवै
वैदिकैः पौराणिकैर्मंत्रैर्वाअभिषिंचेयुः तत्र
मंत्राः ॐदेवस्यत्वा सवितुःप्रसवेश्विनोर्बाहु
भ्यांपूष्णोहस्ताभ्यांसरस्वत्यैवाचोयंतुर्यंत्रेणा
ग्नेस्साम्राज्येनाभिषिंचामि १ ॐदेवस्यत्वासवि
तुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां अ
श्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिं
चामि २ ॐकोसिकतमोसिकस्मैत्वाकायत्वा
सुश्लोकसुमंगलसत्यराजन् शिरोमेश्रीर्यशो
मुखंत्विषिःकेशाश्चश्मश्रूणि ३ ॐराजामेप्राणो
अमृतंसम्राट्चक्षुर्विराट्श्रोत्रंजिह्वामेभ
द्रंवाङ्महोमनोमन्युःस्वराड्भामः ४ मोदाः
प्रमोदा अंगुलीरंगानिमित्रंमेसहः बाहूमेब
लमिंद्रियंहस्तौमेकर्मवीर्यं ५ आत्मात
त्रमुरोममपृष्ठीर्मेराष्ट्रमुदरमंसौग्रीवाश्च
श्रोणीऊरूअरत्नीजानुनीविशोमेंगानिसर्व
तः ६ नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्भस

उ॰
गी॰
२९

26

न् आनंद नंदाथा ओं मे भरा: सोमा: पंचसः १
जेगाश्वांपद्रीा यर्मोस्मि विशिम्ज्ञाप्रतिष्ठि
तः प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रे प्रत्यश्वेषुप्रति
तिष्ठामिगोषु प्रत्यङ्गेषुप्रतितिष्ठाम्यात्म
न्प्रतिप्राणेषुप्रतितिष्ठामि पुष्टेप्रतिद्यावापृ
थिव्यो: प्रतितिष्ठामियज्ञे ४ त्रयोदेवाएकाद
शत्रयस्त्रिंशा: सुराधसः बृहस्पतिपुरोहि
ताः देवस्यसवितुःसवेदेवादेवैरवन्तुमा ८
प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृती
याः सत्येनसत्यंयज्ञेनयज्ञोयजुर्भिर्यजूंषि
सामभिस्सामान्यृग्भिर्ऋचःपुरोनुवाक्याभिः
पुरोनुवाक्यायाज्याभिर्याज्या २९ वषट्कारै
र्वषट्काराआहुतिभिराहुतयोमेकामान्समर्द्ध
यन्तु १० अग्नेस्तेजसासूर्यस्यवर्चसेंद्रस्येंद्रिये
णाभिषिंचामिबलायश्रियेयशसेन्नाद्याय ८
सोमस्यत्वाद्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसासू
र्यस्यवर्चसेंद्रस्येन्द्रियेणक्षत्राणांक्षत्रपतिरेध्य
तिदिद्यून्पाहि १३ ओं आब्रह्मन्ब्राह्मणोब्रह्मवर्च
सीजायतामाराष्ट्रेराजन्यःशूरइषव्योतिव्याधी
महारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिः

पुरंध्रीर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य
जमानस्य वीरो जायतां निकामे निकामे नः प
र्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां यो
गक्षेमो नः कल्पतां २४ ॐ इमं देवा ऽसपत्न
ꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते
जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रम
मुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं
ब्राह्मणानाꣳ राजा २५ ॐ ज्यैष्ठ्यं च म ऽआधिपत्यं
च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा
च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षि
मा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन
कल्पन्तां २६ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां
छुबुकादधि यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि
वृहामि ते २७ ग्रीवाभ्यस्त उष्णिहाभ्यः कीक
साभ्यो अनूक्यात् यक्ष्मं दोषण्यमꣳसाभ्यां बा
हुभ्यां विवृहामि ते २८ आन्त्रेभ्यस्ते गुदाभ्यो वनि
ष्ठोर्हृदयादधि यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो
विवृहामि ते २९ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां
ते प्रपदाभ्यां यक्ष्मं श्रोणिभ्यां भासदाद्भꣳससो
विवृहामि ते ३० मेहनाद्दुःकरणं लोमभ्यस्ते

नखेभ्यः यक्ष्मंसर्वस्मादात्मनस्तमिविवृहामि
ते २१ अंगादंगाल्लोम्नोजातंपर्वणिपर्वणि
यक्ष्मंसर्वस्मादात्मनस्तमिविवृहामिते २२
आपोहिष्ठामयोभुवस्तानऊर्जेदधातनमहे
रणायचक्षसे २३ योवःशिवतमोरसस्तस्यभा
जयतेहनः उशतीरिवमातरः २४ तस्माअ
रङ्गमामवोयस्यक्षयायजिन्वथआपोजनय
थाचनः २५ सर्वेसमुद्राःसरितस्तीर्थानिज
लदानदाः आयान्तुयजमानस्यदुरितक्षय
कारकाः २६ ॐस्वस्तिनःइन्द्रोवृद्धश्रवाःस्वस्ति
नःपूषाविश्ववेदाः ॐस्वस्तिनस्तार्क्ष्योअरिष्टने
मिःस्वस्तिनोबृहस्पतिर्दधातु २७ पयःपृथि
व्यांपयओषधीषुपयोदिव्यन्तरिक्षेपयोधाःप
यस्वतीःप्रदिशःसन्तुमह्यं २८ विष्णोरराटम
सिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवो
सिवैष्णवमसिविष्णवेत्वाअग्निर्देवतावातोदे
वतासूर्योदेवताचन्द्रमादेवतावसवोदेवता
रुद्रादेवतादित्यादेवतामरुतोदेवताविश्वे
देवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणो
देवता २९ मूर्धासिराड्ध्रुवासिधरुणाधर्त्र्य

स्मियरणी आयुषे त्वा वर्चसे त्वा १३ द्यौः शांतिरं
तरिक्षं शांतिः पृथिवी शांतिरोषधयः शां
तिर्वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्म
शांतिः सर्वं शांतिः शांतिरेव शांतिः सा
मा शांतिरेधि ॥ सुशांतिर्भवतु १४ अथ पौरा
णिकमंत्राः सुरास्त्वामभिषिंचंतु ब्रह्मविष्णु
महेश्वराः वासुदेवो जगन्नाथस्तथा संकर्ष
णो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवंतु विज
याय ते आखण्डलोग्निर्भगवान्यमो वै निरृ
तिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्त
था शिवः ब्रह्मणा सहितः शेषो दिक्पालाः पा
न्तु ते सदा ३ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्र
द्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः
कांतिश्च मातरः ४ एतास्त्वामभिषिंचन्तु देवप
त्न्यः समागताः आदित्यश्चन्द्रमा भौमो बुधजी
वसितार्कजाः ५ ग्रहास्त्वामभिषिंचंतु राहुके
तुश्च पूजिताः देवदानवगंधर्वा यक्षराक्षस
पन्नगाः ६ ऋषयो मनवो गावो देवमातर
एव च देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां
गणाः ७ अस्त्राणि सर्वशास्त्राणि राजानो वाहना

उ. गो. २८

28

निच ॐ यथा निचरन्ता निकालस्यावयवा
श्चये ८ सरितः सागराः शैलास्तीर्थानि जलदा
नदाः एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ९
ॐ विश्वानि स्थानि देव सवितर्दुरितानि परासु
व १० शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्त
दस्तु दस्तु यत्पापं रोगाः शोकाः कष्टं दुःखं दारि
द्र्यं तत्प्रतिहतमस्तुः अमृताभिषेकोऽस्तु शां
तिर्भवतु भवतु इत्यभिषेकमंत्राः अथ तिल
ककरणमंत्राः भद्रमस्तु शिवं चास्तु महालक्ष्मी
प्रसीदतुः रक्षंतु त्वां सदा देवाः संपदः सन्तु सर्व
दा १ सपत्ना दुर्ग्रहाः पापा दुष्टसत्वाद्युपद्रवाः
तमालपत्रनिष्प्रभावा भवंतु ते २ आभ्यां मंत्रा
भ्यां तिलककरणानंतरं तोषणं च विधाय युं
जंति ब्रध्नमरुषं चरंतं परितस्थुषः रोचंते रो
चना दिवि श्चलनाः पात: अनेन मंत्रेण स्त्रीणां
ललाटे तिलककरणानंतरं तोषणं ततो रक्षा
बंधनमंत्रो यथा येन बद्धो बली राजा दानवें
द्रो महाबलः तेन त्वामपि बध्नामि रक्षे माच
लमाचल १ त्वं यविष्ठ दाशुषो नॄः पाहि शृण
धी गिरः रक्षा तोकमुत त्मना २ आभ्यां मंत्राभ्यां से

दक्षिणकरे स्त्रीणां वामकरे बध्नीयात् ततः
आशीर्वादमन्त्राः ॐ गणानां त्वा गणपतिꣳ
हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे
निधीनां त्वा निधिपतिꣳ हवामहे वसो म
म आहमजानि गर्भधमा त्वमजासि गर्भधम् १
ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्न
मृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो
याति भुवनानि पश्यन् २ इमं देवा ऽसपत्न
ꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय म
हते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य
पुत्रममुष्यै पुत्रमस्यै विश ऽएष वोऽमी राजा
सोमोऽस्माकं ब्राह्मणानाꣳ राजा ३ ॐ अग्नि
र्मूर्द्धा दिवः ककुत्पतिः पृथिव्या ऽअयम्पाꣳ रे
ताꣳसि जिन्वति ४ ॐ उद्बुध्यस्वाग्ने प्रतिजा
गृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयं च अस्मि
न्सधस्थे ऽअध्युत्तरस्मिन् विश्वे देवा यजमान
श्च सीदत ५ बृहस्पते ऽअति यदर्यो ऽअर्हा
द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस
ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं ६
अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः

उ. मो. २५

29

सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानं
शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं
मधु ७ शन्नो देवीरभिष्टय आपो भवन्तु पी
तये शंयोरभिस्रवन्तु नः ८ कया नश्चित्र आ
भुवदूती सदावृधः सखा कया शचिष्ठया वृ
ता ९ केतुं कृण्वन्नकेतवे पेशो मर्या अपेश
से समुषद्भिरजायथाः १० कामं कामदुघे
धुक्ष्व मित्राय वरुणाय च इन्द्रायाश्विभ्यां पूष्णे
प्रजाभ्य ओषधीभ्यः ११ ऋतं च मेऽमृतं च मे
यक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्व
ञ्च मेऽनमित्रं च मेऽभयं च मे सुखं च मे शयनं च
सुदिनं च मे यज्ञेन कल्पन्तां तीव्रान्घोषान्कृ
ण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रू
ंरनपव्ययन्तः दीर्घायुत्व ओषधे खनिता
यस्मै च त्वा खनाम्यहं अथो त्वं दीर्घायुर्भूत्वा
शतवल्शा विरोहितान् सहस्रस्य प्रमासि
साहस्रोऽसि सहस्रायत्वा १५ पुनस्त्वादित्या रु
द्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसु
सहस्रस्य प्रतिमासि सहस्रस्योन्मासि १

नीथयज्ञैः हुतेन वं तत्रं वर्धयस्व समाः सेव
यजमानस्य कामाः १६ युवं सुरामश्विना
नमुचावासुरे सचा विपिपाना शुभस्पती
इन्द्रं कर्मस्वावतं १७ पुत्रमिव पितरावश्वि
नोभेन्द्रावथुः काव्यैर्दंसनाभिः यत्सुरामं
व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभि
ष्णक् १८ शतं जीव शरदो वर्धमानः शतं हे
मन्तान् शतमु वसन्तान् शतमिन्द्राग्नी सवि
ता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः
१९ कांडात्कांडात्प्ररोहन्ती परुषः परुषस्प
रि एवा नो दूर्वे प्रतनु सहस्रेण शतेन च २०
श्रीर्वर्चस्वमायुष्यमारोग्यमाविदथात्पवते
महीयते धान्यं धनं पशुं बहुपुत्रलाभं शतं
संवत्सरं दीर्घमायुः २१ मन्त्रार्थाः सफलाः स
न्तु पूर्णाः सन्तु मनोरथाः शत्रूणां बुद्धिनाशो
स्तु मित्राणामुदयस्तव २२ स्त्रीणां तु विशेषः
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्ष
त्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणाम
मुं इषाण सर्वलोकं म इषाण आयुष्मती
पुत्रवती धनवती सौभाग्यवती जीववत्सा

उ. गो. ३.

भव इत्याशिषो गृहीत्वा ततो यजमानश्चा
वार्याय सकलयज्ञसामग्रीं समार्जयेत्
तेनेचाशीर्भिर्यजमानं वर्द्धयेयुः ततो यज
मानस्तान्विप्रान्भोजयित्वा स्वयं पायसान्नं
भुंजीयादिति शिवम् इत्यभयतोमुखीगो
दानपद्धतिः समगात्व्रमवर्णेधंसं श्री
पंडितब्रजवासीविष्णुशोर्थे संवत् १९५२

30